# Jyautisha Vedangam.pdf/48



**Exported from Wikisource on १७ सितंबरमासः २०२४**

पुटमेतत् सुपुष्टितम्



**नक्षत्रदेवता ह्येता एताभिर्यज्ञकर्मणि ।**
**यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतम् ॥ ४१ ॥**

कृत्तिकादेरेता नक्षत्रदेवताः **संहितागृरन्थेषु** सर्वत्र प्रसिद्धाः । अत्र पूर्वभद्रपदाया अजो वैकपादिति देवताद्वयं वा एकदेवताया नामद्वयम् । एताभिर्देवताभिः शास्त्रज्ञैर्दैववविद्भि**र्यज्ञकर्म**णि यजमानस्य नक्षत्रजं नाम स्मृतं कथितम् । यस्मिन् नक्षत्रे यजमानस्य जन्म तद्देवताबोधकं यजमानस्य यन्नाम तन्नक्षत्रजं नामेति । संप्रति दैवज्ञैर्नक्षत्राणां चत्वारः पादाः क्रियन्ते । यस्मिन् पादे जातस्य जन्म भवति तत्पादबोधकाक्षरादिकं नाम **जन्मनाम** च कथ्यते ॥ ३८-४१ ॥

इदानीं शुभकर्मणि वर्ज्यानि **उग्राणि क्रूराणि** च नक्षत्राण्याह ।

**उग्राण्याद्र्रा च चित्रा च विशाखा श्रवणोऽश्वयुक् ।**
**क्रूराणि तु मघा स्वाती ज्येष्ठा मूलं यमस्य यत् ॥४२॥**

आद्र्रा । चित्रा । विशाखा । श्रवणः । अश्वयुक् अश्विनी । एतानि षट् नक्षत्राणि उग्राणि सन्ति । मघा । स्वाती । ज्येष्ठा । मूलम् । यमस्य नक्षत्रं भरणी । एतानि कूराणि नक्षत्राणि सन्ति ।

**मुहूर्त्तचिन्तामणौ रामेण** च “पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथा"-इत्यनेन उग्रमेव क्रूरं कथ्यते । तथैतद्गणे **ज्योतिषवेदाङ्गो**क्तेभ्यो बहूनि भिन्नानि पठितानीति ॥ ४२ ॥

इदानीं **वेधोपाय**माह ।

**इत्युपायसमुद्देशो भूयोऽप्येवं प्रकल्पयेत् ।**
**ज्ञेयराशिं गताभ्यस्तं विभजेज्ज्ञानराशिना ॥ ४३ ॥**

इत्येव पूर्वोदितविधिना उपायसमुद्देशो वेधोपायोपदेश एव बोध्यः । वेधेन ज्ञातराशौ गतं प्राप्तं कमपि पदार्थं विज्ञाय ततो ज्ञेयराशौ तत्पदार्थानयनार्थं गणको ज्ञानराशिसम्बन्धिगतेन पदार्थेनाभ्यस्तं गुणितं ज्ञेयराशिं

# About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Surekha Kamath
- Shubha
- संस्कृतवाणी
- Premaskanth13
- N.R.Bahlika Rao
- Madhava char n

- Wikisource-bot
- Soorya Hebbar

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium